# Shri Ramastavaraja from Sanatkumarasamhita

# શ્રીરામસ્તવરાજઃ સનત્કુમારસંહિતાયામ્

## Document Information

Text title : rAmastavarAjastotra

File name : rAmastavarAjastotra.itx

Category : stavarAja, raama

Location : doc_raama

Transliterated by : Madhavi U mupadrasta at gmail.com

Proofread by : Madhavi U mupadrasta at gmail.com

Description-comments : sanatkumArasaMhitAyAM nAradoktam. Same is shivokta in Anandaramayana Vilasakanda Prathama Sarga

Latest update : June 23, 2012, December 21, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 15, 2024

*sanskritdocuments.org*

Shri Ramastavaraja from Sanatkumarasamhita

# શ્રીરામસ્તવરાજઃ સનત્કુમારસંહિતાયામ્

અસ્ય શ્રીરામચન્દ્રસ્તવરાજસ્તોત્રમન્ત્રસ્ય સનત્કુમારઋષિઃ ।
શ્રીરામો દેવતા । અનુષ્ટુપ્ છન્દઃ । સીતા બીજમ્ । હનુમાન્ શક્તિઃ ।
શ્રીરામપ્રીત્યર્થે જપે વિનિયોગઃ ॥

સૂત ઉવાચ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞં વ્યાસં સત્યવતીસુતમ્ । સર્વવેદાર્થ
ધર્મપુત્રઃ પ્રહૃષ્ટાત્મા પ્રત્યુવાચ મુનીશ્વરમ્ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ ।
ભગવન્યોગિનાં શ્રેષ્ઠ સર્વશાસ્ત્રવિશારદ ।
કિં તત્ત્વં કિં પરં જાપ્યં કિં ધ્યાનં મુક્તિસાધનમ્ ॥ ૨॥

શ્રોતુમિચ્છામિ તત્સર્વં બ્રૂહિ મે મુનિસત્તમ ।
વેદવ્યાસ ઉવાચ ।
ધર્મરાજ મહાભાગ શ ૃણુ વક્ષ્યામિ તત્ત્વતઃ ॥ ૩॥

યત્પરં યદ્ગુણાતીતં યજ્જ્યોતિરમલં શિવમ્ ।
તદેવ પરમં તત્ત્વં કૈવલ્યપદકારણમ્ ॥ ૪॥

શ્રીરામેતિ પરં જાપ્યં તારકં બ્રહ્મસઞ્જ્ઞકમ્ ।
બ્રહ્મહત્યાદિપાપઘ્નમિતિ વેદવિદો વિદુઃ ॥ ૫॥

શ્રીરામ રામેતિ જના યે જપન્તિ ચ સર્વદા ।
તેષાં ભુક્તિશ્ચ મુક્તિશ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૬॥

સ્તવરાજં પુરા પ્રોક્તં નારદેન ચ ધીમતા ।
તત્સર્વં સમ્પ્રવક્ષ્યામિ હરિધ્યાનપુરઃસરમ્ ॥ ૭॥

તાપત્રયાગ્નિશમનં સર્વાઘૌઘનિકૃન્તનમ્ ।
દારિદ્ર્યદુઃખશમનં સર્વસમ્પત્કરં શિવમ્ ॥ ૮॥

વિજ્ઞાનફલદં દિવ્યં મોક્ષૈકફલસાધનમ્ ।
નમસ્કૃત્ય પ્રવક્ષ્યામિ રામં કૃષ્ણં જગન્મયમ્ ॥ ૯॥

અયોધ્યાનગરે રમ્યે રત્નમણ્ડપમધ્યગે ।
સ્મરેત્કલ્પતરોર્મૂલે રત્નસિંહાસનં શુભમ્ ॥ ૧૦॥

તન્મધ્યેઽષ્ટદલં પદ્મં નાનારત્નૈશ્ચ વેષ્ટિતમ્ ।
સ્મરેન્મધ્યે દાશરથિં સહસ્રાદિત્યતેજસમ્ ॥ ૧૧॥

પિતુરઙ્કગતં રામમિન્દ્રનીલમણિપ્રભમ્ ।
કોમલાઙ્ગં વિશાલાક્ષં વિદ્યુદ્વર્ણામ્બરાવૃતમ્ ॥ ૧૨॥

ભાનુકોટિપ્રતીકાશં કિરીટેન વિરાજિતમ્ ।
રત્નગ્રૈવેયકેયૂરરત્નકુણ્ડલમણ્ડિતમ્ ॥ ૧૩॥

રત્નકઙ્કણમઞ્જીરકટિસૂત્રૈરલઙ્કૃતમ્ ।
શ્રીવત્સકૌસ્તુભોરસ્કં મુક્તાહારોપશોભિતમ્ ॥ ૧૪॥

દિવ્યરત્નસમાયુક્તમુદ્રિકાભિલઙ્કૃતમ્ ।
રાઘવં દ્વિભુજં બાલં રામમીષત્સ્મિતાનનમ્ ॥ ૧૫॥

તુલસીકુન્દમન્દારપુષ્પમાલ્યૈરલઙ્કૃતમ્ ।
કર્પૂરાગરુકસ્તૂરીદિવ્યગન્ધાનુલેપનમ્ ॥ ૧૬॥

યોગશાસ્ત્રેષ્વભિરતં યોગેશં યોગદાયકમ્ ।
સદા ભરતસૌમિત્રિશત્રુઘ્નૈરુપશોભિતમ્ ॥ ૧૭॥

વિદ્યાધરસુરાધીશસિદ્ધગન્ધર્વકિન્નરૈઃ ।
યોગીન્દ્રૈર્નારદાદ્યૈશ્ચ સ્તૂયમાનમહર્નિશમ્ ॥ ૧૮॥

વિશ્વામિત્રવસિષ્ઠાદિમુનિભિઃ પરિસેવિતમ્ ।
સનકાદિમુનિશ્રેષ્ઠૈર્યોગિવૃન્દૈશ્ચ સેવિતમ્ ॥ ૧૯॥

રામં રઘુવરં વીરં ધનુર્વેદવિશારદમ્ ।
મઙ્ગલાયતનં દેવં રામં રાજીવલોચનમ્ ॥ ૨૦॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞમાનન્દકરસુન્દરમ્ ।
કૌસલ્યાનન્દનં રામં ધનુર્બાણધરં હરિમ્ ॥ ૨૧॥

એવં સઞ્ચિન્તયન્વિષ્ણું યજ્જ્યોતિરમલં વિભુમ્ ।
પ્રહૃષ્ટમાનસો ભૂત્વા મુનિવર્યઃ સ નારદઃ ॥ ૨૨॥

સર્વલોકહિતાર્થાય તુષ્ટાવ રઘુનન્દનમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા ચિન્તયન્નદ્ભુતં હરિમ્ ॥ ૨૩॥

યદેકં યત્પરં નિત્યં યદનન્તં ચિદાત્મકમ્ ।
યદેકં વ્યાપકં લોકે તદ્રૂપં ચિન્તયામ્યહમ્ ॥ ૨૪॥

વિજ્ઞાનહેતું વિમલાયતાક્ષં પ્રજ્ઞાનરૂપં સ્વસુખૈકહેતુમ્ ।
શ્રીરામચન્દ્રં હરિમાદિદેવં પરાત્પરં રામમહં ભજામિ ॥ ૨૫॥

કવિં પુરાણં પુરુષં પુરસ્તાત્સનાતનં યોગિનમીશિતારમ્ ।
અણોરણીયાંસમનન્તવીર્યં પ્રાણેશ્વરં રામમસૌ દદર્શ ॥ ૨૬॥

નારદ ઉવાચ ।
નારાયણં જગન્નાથમભિરામં જગત્પતિમ્ ।
કવિં પુરાણં વાગીશં રામં દશરથાત્મજમ્ ॥ ૨૭॥

રાજરાજં રઘુવરં કૌસલ્યાનન્દવર્ધનમ્ ।
ભર્ગં વરેણ્યં વિશ્વેશં રઘુનાથં જગદ્ગુરુમ્ ॥ ૨૮॥

સત્યં સત્યપ્રિયં શ્રેષ્ઠં જાનકીવલ્લભં વિભુમ્ ।
સૌમિત્રિપૂર્વજં શાન્તં કામદં કમલેક્ષણમ્ ॥ ૨૯॥

આદિત્યં રવિમીશાનં ઘૃણિં સૂર્યમનામયમ્ ।
આનન્દરૂપિણં સૌમ્યં રાઘવં કરુણામયમ્ ॥ ૩૦॥

જામદગ્ન્યં તપોમૂર્તિં રામં પરશુધારિણમ્ ।
વાક્પતિં વરદં વાચ્યં શ્રીપતિં પક્ષિવાહનમ્ ॥ ૩૧॥

શ્રીશાર્ઙ્ગધારિણં રામં ચિન્મયાનન્દવિગ્રહમ્ ।
હલધૃગ્વિષ્ણુમીશાનં બલરામં કૃપાનિધિમ્ ॥ ૩૨॥

શ્રીવલ્લભં કૃપાનાથં જગન્મોહનમચ્યુતમ્ ।
મત્સ્યકૂર્મવરાહાદિરૂપધારિણમવ્યયમ્ ॥ ૩૩॥

વાસુદેવં જગદ્યોનિમનાદિનિધનં હરિમ્ ।
ગોવિન્દં ગોપતિં વિષ્ણું ગોપીજનમનોહરમ્ ॥ ૩૪॥

ગોગોપાલપરીવારં ગોપકન્યાસમાવૃતમ્ ।
વિદ્યુત્પુઞ્જપ્રતીકાશં રામં કૃષ્ણં જગન્મયમ્ ॥ ૩૫॥

ગોગોપિકાસમાકીર્ણં વેણુવાદનતત્પરમ્ ।
કામરૂપં કલાવન્તં કામિનીકામદં વિભુમ્ ॥ ૩૬॥

મન્મથં મથુરાનાથં માધવં મકરધ્વજમ્ ।
શ્રીધરં શ્રીકરં શ્રીશં શ્રીનિવાસં પરાત્પરમ્ ॥ ૩૭॥

ભૂતેશં ભૂપતિં ભદ્રં વિભૂતિં ભૂતિભૂષણમ્ ।
સર્વદુઃખહરં વીરં દુષ્ટદાનવવૈરિણમ્ ॥ ૩૮॥

શ્રીનૃસિંહં મહાબાહું મહાન્તં દીપ્તતેજસમ્ ।
ચિદાનન્દમયં નિત્યં પ્રણવં જ્યોતિરૂપિણમ્ ॥ ૩૯॥

આદિત્યમણ્ડલગતં નિશ્ચિતાર્થસ્વરૂપિણમ્ ।
ભક્તપ્રિયં પદ્મનેત્રં ભક્તાનામીપ્સિતપ્રદમ્ ॥ ૪૦॥

કૌસલ્યેયં કલામૂર્તિં કાકુત્સ્થં કમલાપ્રિયમ્ ।
સિંહાસને સમાસીનં નિત્યવ્રતમકલ્મષમ્ ॥ ૪૧॥

વિશ્વામિત્રપ્રિયં દાન્તં સ્વદારનિયતવ્રતમ્ ।
યજ્ઞેશં યજ્ઞપુરુષં યજ્ઞપાલનતત્પરમ્ ॥ ૪૨॥

સત્યસન્ધં જિતક્રોધં શરણાગતવત્સલમ્ ।
સર્વક્લેશાપહરણં વિભીષણવરપ્રદમ્ ॥ ૪૩॥

દશગ્રીવહરં રૌદ્રં કેશવં કેશિમર્દનમ્ ।
વાલિપ્રમથનં વીરં સુગ્રીવેપ્સિતરાજ્યદમ્ ॥ ૪૪॥

નરવાનરદેવૈશ્ચસેવિતં હનુમત્પ્રિયમ્ ।
શુદ્ધં સૂક્ષ્મં પરં શાન્તં તારકાબ્રહ્મરૂપિણમ્ ॥ ૪૫॥

સર્વભૂતાત્મભૂતસ્થં સર્વાધારં સનાતનમ્ ।
સર્વકારણકર્તારં નિદાનં પ્રકૃતેઃ પરમ્ ॥ ૪૬॥

નિરામયં નિરાભાસં નિરવદ્યં નિરઞ્જનમ્ ।
નિત્યાનન્દં નિરાકારમદ્વૈતં તમસઃ પરમ્ ॥ ૪૭॥

પરાત્પરતરં તત્ત્વં સત્યાનન્દં ચિદાત્મકમ્ ।
મનસા શિરસા નિત્યં પ્રણમામિ રઘૂત્તમમ્ ॥ ૪૮॥

સૂર્યમણ્ડલમધ્યસ્થં રામં સીતાસમન્વિતમ્ ।
નમામિ પુણ્ડરીકાક્ષમમેયં ગુરુતત્પરમ્ ॥ ૪૯॥

નમોઽસ્તુ વાસુદેવાય જ્યોતિષાં પતયે નમઃ ।
નમોઽસ્તુ રામદેવાય જગદાનન્દરૂપિણે ॥ ૫૦॥

નમો વેદાન્તનિષ્ઠાય યોગિને બ્રહ્મવાદિને ।
માયામયનિરાસાય પ્રપન્નજનસેવિને ॥ ૫૧॥

વન્દામહે મહેશાનચણ્ડકોદણ્ડખણ્ડનમ્ ।
જાનકીહૃદયાનન્દવર્ધનં રઘુનન્દનમ્ ॥ ૫૨॥

ઉત્ફુલ્લામલકોમલોત્પલદલશ્યામાય રામાય તે
    કામાય પ્રમદામનોહરગુણગ્રામાય રામાત્મને ।
યોગારૂઢમુનીન્દ્રમાનસસરોહંસાય સંસારવિધ્વંસાય
    સ્ફુરદોજસે રઘુકુલોત્તંસાય પુંસે નમઃ ॥ ૫૩॥

ભવોદ્ભવં વેદવિદાં વરિષ્ઠમાદિત્યચન્દ્રાનલસુપ્રભાવમ્ ।
સર્વાત્મકં સર્વગતસ્વરૂપં નમામિ રામં તમસઃ પરસ્તાત્ ॥ ૫૪॥

નિરઞ્જનં નિઃપ્રતિમં નિરીહં નિરાશ્રયં નિષ્કલમપ્રપઞ્ચમ્ ।
નિત્યં ધ્રુવં નિર્વિષયસ્વરૂપં નિરન્તરં રામમહં ભજામિ ॥ ૫૫॥

ભવાબ્ધિપોતં ભરતાગ્રજં તં ભક્તપ્રિયં ભાનુકુલપ્રદીપમ્ ।
ભૂતત્રિનાથં ભુવનાધિપં તં ભજામિ રામં ભવરોગવૈદ્યમ્ ॥ ૫૬॥

સર્વાધિપત્યં સમરાઙ્ગધીરં સત્યં ચિદાનન્દમયસ્વરૂપમ્ ।
સત્યં શિવં શાન્તિમયં શરણ્યં સનાતનં રામમહં ભજામિ ॥ ૫૭॥

કાર્યક્રિયાકારણમપ્રમેયં કવિં પુરાણં કમલાયતાક્ષમ્ ।
કુમારવેદ્યં કરુણામયં તં કલ્પદ્રુમં રામમહં ભજામિ ॥ ૫૮॥

ત્રૈલોક્યનાથં સરસીરુહાક્ષં દયાનિધિં દ્વન્દ્વવિનાશહેતુમ્ ।
મહાબલં વેદવિધિં સુરેશં સનાતનં રામમહં ભજામિ ॥ ૫૯॥

વેદાન્તવેદ્યં કવિમીશિતારમનાદિમધ્યાન્તમચિન્ત્યમાદ્યમ્ ।
અગોચરં નિર્મલમેકરૂપં નમામિ રામં તમસઃ પરસ્તાત્ ॥ ૬૦॥

અશેષવેદાત્મકમાદિસઞ્જ્ઞમજં હરિં વિષ્ણુમનન્તમાદ્યમ્ ।
અપારસંવિત્સુખમેકરૂપં પરાત્પરં રામમહં ભજામિ ॥ ૬૧॥

તત્ત્વસ્વરૂપં પુરુષં પુરાણં સ્વતેજસા પૂરિતવિશ્વમેકમ્ ।

રાજાધિરાજં રવિમણ્ડલસ્થં વિશ્વેશ્વરં રામમહં ભજામિ ॥ ૬૨॥

લોકાભિરામં રઘુવંશનાથં હરિં ચિદાનન્દમયં મુકુન્દમ્ ।
અશેષવિદ્યાધિપતિં કવીન્દ્રં નમામિ રામં તમસઃ પરસ્તાત્ ॥ ૬૩॥

યોગીન્દ્રસઙ્ઘૈશ્ચ સુસેવ્યમાનં નારાયણં નિર્મલમાદિદેવમ્ ।
નતોઽસ્મિ નિત્યં જગદેકનાથમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૬૪॥

વિભૂતિદં વિશ્વસૃજં વિરામં રાજેન્દ્રમીશં રઘુવંશનાથમ્ ।
અચિન્ત્યમવ્યક્તમનન્તમૂર્તિં જ્યોતિર્મયં રામમહં ભજામિ ॥ ૬૫॥

અશેષસંસારવિહારહીનમાદિત્યગં પૂર્ણસુખાભિરામમ્ ।
સમસ્તસાક્ષિં તમસઃ પરસ્તાન્નારાયણં વિષ્ણુમહં ભજામિ ॥ ૬૬॥

મુનીન્દ્રગુહ્યં પરિપૂર્ણકામં કલાનિધિં કલ્મષનાશહેતુમ્ ।
પરાત્પરં યત્પરમં પવિત્રં નમામિ રામં મહતો મહાન્તમ્ ॥ ૬૭॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ દેવેન્દ્રો દેવતાસ્તથા ।
આદિત્યાદિગ્રહાશ્ચૈવ ત્વમેવ રઘુનન્દન ॥ ૬૮॥

તાપસા ઋષયઃ સિદ્ધાઃ સાધ્યાશ્ચ મરુતસ્તથા ।
વિપ્રા વેદાસ્તથા યજ્ઞાઃ પુરાણધર્મસંહિતાઃ ॥ ૬૯॥

વર્ણાશ્રમાસ્તથા ધર્મા વર્ણધર્માસ્તથૈવ ચ ।
યક્ષરાક્ષસગન્ધર્વાદિક્પાલા દિગ્ગજાદયઃ ॥ ૭૦॥

સનકાદિમુનિશ્રેષ્ઠાસ્ત્વમેવ રઘુપુઙ્ગવ ।
વસવોઽષ્ટૌ ત્રયઃ કાલા રુદ્રા એકાદશ સ્મૃતાઃ ॥ ૭૧॥

તારકા દશ દિક્ ચૈવ ત્વમેવ રઘુનન્દન ।
સપ્તદ્વીપાઃ સમુદ્રાશ્ચ નગા નદ્યસ્તથા દ્રુમાઃ ॥ ૭૨॥

સ્થાવરા જઙ્ગમાશ્ચૈવ ત્વમેવ રઘુનાયક ।
દેવતિર્યઙ્મનુષ્યાણાં દાનવાનાં તથૈવ ચ ॥ ૭૩॥

માતા પિતા તથા ભ્રાતા ત્વમેવ રઘુવલ્લભ ।
સર્વેષાં ત્વં પરં બ્રહ્મ ત્વન્મયં સર્વમેવ હિ ॥ ૭૪॥

ત્વમક્ષરં પરં જ્યોતિસ્ત્વમેવ પુરુષોત્તમ ।
ત્વમેવ તારકં બ્રહ્મ ત્વત્તોઽન્યન્નૈવ કિઞ્ચન ॥ ૭૫॥

શાન્તં સર્વગતં સૂક્ષ્મં પરં બ્રહ્મ સનાતનમ્ ।
રાજીવલોચનં રામં પ્રણમામિ જગત્પતિમ્ ॥ ૭૬॥

વ્યાસ ઉવાચ ।
તતઃ પ્રસન્નઃ શ્રીરામઃ પ્રોવાચ મુનિપુઙ્ગવમ્ ।
તુષ્ટોઽસ્મિ મુનિશાર્દૂલ વૃણીષ્વ વરમુત્તમમ્ ॥ ૭૭॥

નારદ ઉવાચ ।
યદિ તુષ્ટોઽસિ સર્વજ્ઞ શ્રીરામ કરુણાનિધે ।
ત્વન્મૂર્તિદર્શનેનૈવ કૃતાર્થોઽહં ચ સર્વદા ॥ ૭૮॥

ધન્યોઽહં કૃતકૃત્યોઽહં પુણ્યોઽહં પુરુષોત્તમ ।
અદ્ય મે સફલં જન્મ જીવિતં સફલં ચ મે ॥ ૭૯॥

અદ્ય મે સફલં જ્ઞાનમદ્ય મે સફલં તપઃ ।
અદ્ય મે સફલં કર્મ ત્વત્પાદામ્ભોજદર્શનાત્ ।
અદ્ય મે સફલં સર્વં ત્વન્નામસ્મરણં તથા ॥ ૮૦॥

ત્વત્પાદામ્ભોરુહદ્વન્દ્વસદ્ભક્તિં દેહિ રાઘવ ।
તતઃ પરમસમ્પ્રીતઃ સ રામઃ પ્રાહ નારદમ્ ॥ ૮૧॥

શ્રીરામ ઉવાચ ।
મુનિવર્ય મહાભાગ મુનેત્વિષ્ટં દદામિ તે ।
યત્ત્વયા ચેપ્સિતં સર્વં મનસા તદ્ભવિષ્યતિ ॥ ૮૨॥

નારદ ઉવાચ ।
વરં ન યાચે રઘુનાથ યુષ્મત્પદાબ્જભક્તિઃ સતતં મમાસ્તુ ।
ઇદં પ્રિયં નાથ વરં હિ યાચે પુનઃપુનસ્ત્વામિદમેવ યાચે ॥ ૮૩॥

વ્યાસ ઉવાચ ।
ઇત્યેવમીડિતો રામઃ પ્રાદાત્તસ્મૈ વરાન્તરમ્ ।
વીરો રામો મહાતેજાઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૮૪॥

અદ્વૈતમમલં જ્ઞાનં સ્વનામસ્મરણં તથા ।
અન્તર્દધૌ જગન્નાથઃ પુરતસ્તસ્ય રાઘવઃ ॥ ૮૫॥

ઇતિ શ્રીરઘુનાથસ્ય સ્તવરાજમનુત્તમમ્ ।
સર્વસૌભાગ્યસમ્પત્તિદાયકં મુક્તિદં શુભમ્ ॥ ૮૬॥

કથિતં બ્રહ્મપુત્રેણ વેદાનાં સારમુત્તમમ્ ।
ગુહ્યાદ્ગુહ્યતમં દિવ્યં તવ સ્નેહાત્પ્રકીર્તિતમ્ ॥ ૮૭॥

યઃ પઠેચ્છૃણુયાદ્વાપિ ત્રિસન્ધ્યં શ્રદ્ધયાન્વિતઃ ।
બ્રહ્મહત્યાદિપાપાનિ તત્સમાનિ બહૂનિ ચ ॥ ૮૮॥

સ્વર્ણસ્તેયં સુરાપાનં ગુરુતલ્પગતિસ્તથા ।
ગોવધાદ્યુપપાપાનિ અનૃતાત્સમ્ભવાનિ ચ ॥ ૮૯॥

સર્વૈઃ પ્રમુચ્યતે પાપૈઃ કલ્પાયુતશતોદ્ભવૈઃ ।
માનસં વાચિકં પાપં કર્મણા સમુપાર્જિતમ્ ॥ ૯૦॥

શ્રીરામસ્મરણેનૈવ તત્ક્ષણાન્નશ્યતિ ધ્રુવમ્ ।
ઇદં સત્યમિદં સત્યં સત્યમેતદિહોચ્યતે ॥ ૯૧॥

રામં સત્યં પરં બ્રહ્મ રામાત્કિઞ્ચિન્ન વિદ્યતે ।
તસ્માદ્રામસ્વરૂપં હિ સત્યં સત્યમિદં જગત્ ॥ ૯૨॥

શ્રીરામચન્દ્ર રઘુપુઙ્ગવ રાજવર્ય
રજેન્દ્ર રામ રઘુનાયક રાઘવેશ ।
રાજાધિરાજ રઘુનન્દન રામચન્દ્ર
દાસોઽહમદ્યભવતઃ શરણાગતોઽસ્મિ ॥ ૯૩॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે મધ્યે
પુષ્પકૃતાસને મણિમયે વીરાસને સંસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનીન્દ્રૈઃ પરં
વ્યાખ્યાતં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૯૪॥

રામં રત્નકિરીટકુણ્ડલયુતં કેયૂરહારાન્વિતં
સીતાલઙ્કૃતવામભાગમમલં સિંહાસનસ્થં વિભુમ્ ।
સુગ્રીવાદિહરીશ્વરૈઃ સુરગણૈઃ સંસેવ્યમાનં સદા
વિશ્વામિત્રપરાશરાદિમુનિભિઃ સંસ્તૂયમાનં પ્રભુમ્ ॥ ૯૫॥

સકલગુણનિધાનં યોગિભિઃ સ્તૂયમાનં
ભુજવિજિતસમાનં રાક્ષસેન્દ્રાદિમાનમ્ ।
મહિતનૃપભયાનં સીતાયા શોભમાનં
સ્મર હૃદય વિમાનં બ્રહ્મ રામાભિધાનમ્ ॥ ૯૬॥

રઘુવર તવ મૂર્તિર્મામકે માનસાબ્જે

નરકગતિહરં તે નામધેયં મુખે મે ।
અનિશમતુલભક્ત્યા મસ્તકં ત્વત્પાદાબ્જે
ભવજલનિધિમગ્નં રક્ષમામાર્તબન્ધો ॥ ૯૭॥

રામરત્નમહં વન્દે ચિત્રકૂટપતિં હરિમ્ ।
કૌસલ્યાભક્તિસમ્ભૂતં જાનકીકણ્ઠભૂષણમ્ ॥ ૯૮॥

વિમલકમલનેત્રં વિસ્ફુરન્નીલગાત્રં
તપનકુલપવિત્રં દાનવિદ્ધાંસમિત્રમ્ ।
ભુવનકુલચરિત્રં ભૂમિપુત્રિકલત્રમ્-
અમિતગુણસમુદ્રં રામચન્દ્રં નમામિ ॥ ૯૯॥

ઇતિ શ્રીસનત્કુમારસંહિતાયાં નારદોક્તં શ્રીરામસ્તવરાજસ્તોત્રં સમ્પૂર્ણમ્ ॥

Also from stotrArNavaH
॥ ઇતિ શ્રીહિરણ્યગર્ભસંહિતાયાં બ્રહ્મનારદસંવાદે
શ્રીરઘુનાથસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Almost identical stavarAja is found in the Anandaramayana
vilAsakANDa prathamasarga replacing nArada by Shiva.

Encoded and proofread by Madhavi U mupadrasta at gmail.com

*Shri Ramastavaraja from Sanatkumarasamhita*
pdf was typeset on March 15, 2024

Please send corrections to *sanskrit@cheerful.com*